
त्रैमासिकी / सप्टम्बर् २०२३

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



सप्टम्बर् २०२३

# अनुक्रमणिका


| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | २ |
| मनोकामना | ४ |
| सुभाषितम् | ४ |
| अधिकमासः | ५ |
| श्रीकृष्णः | ५ |
| बालरञ्जनी | |
| श्रीकृष्णः गोकुलं प्राप्नोति | ६ |
| शब्दपटः | ७ |
| रुचिरा | ८ |
| हास्यकणिका | ८ |
| भक्त्याः पराकाष्ठा | ९ |
| भारती बहुभाषिणी | ९ |
| तस्मै पाणिनये नमः | १० |
| कैवल्योपनिषत् | ११ |
| योगविषये किञ्चित् ... | १२ |
| उत्तराणि | १२ |

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

ईश्वरः आनन्दस्वरूपः अस्ति। यदा कोऽपि साधकः ईदृशम् आनन्दमयम् ईश्वरं सुखाय प्रार्थयते तदा सः आत्मानं तस्मात् ईश्वरात् भिन्नम् इति मन्यते । वस्तुतः ईश्वरः सर्वेषां हृदये एव निवासं करोति ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

अहङ्कारे परिशुद्धे जाते साधकः अनिर्बन्धप्रेम्णा प्रेरितः भवति । तदनु निरन्तरं सः दिव्यतायामेव निबद्धः भवति । एवम् अतिशीघ्रम् एषा दिव्यता तेन सह तादात्म्यं स्थापयति।

गुरूपदेशानुवादः - सुजाता हळदीपुर , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

रजः प्रशान्तं सहिमोऽद्य वायुः निदाघदोषप्रसराः प्रशान्ताः ।

आदिकवि-वाल्मीकिरचित-रामायणतः उद्धृत-श्लोकस्य पूर्वार्धः ।

वर्षाकालः आषाढमासे धरित्र्यां पदार्पणं कृत्वा ग्रीष्म-आतपेन व्याकुलभूतजगति नवसञ्जीवनीं सिञ्चति । अयं वर्षाकालः संस्मारयति महाकविकालिदासस्य विश्रुतकाव्यं 'मेघदूतम्' यस्य प्रारम्भः भवति आषाढमासवर्णनेन ।

श्रावणमासे तु प्राकृतिक-सौन्दर्यम् अतीव मनोहरम् । सर्वत्र हरितिमा दृष्टिगोचरी भवति । वर्षायाः शीतलजलस्य परिष्वङ्गेन नवचैतन्यं सम्प्राप्य सूर्यस्य कोमलकिरणानां सुखदस्पर्शेण च दोलायमानाः तरुवृक्षाः नवनवपल्लवितपुष्पवल्लीलताः जनमनसि उल्लासं सञ्जनयन्ति । अयं मनोभिराम-प्रफुल्ल-वातावरणस्य नूतनतरङ्गः जगन्नियन्तापरमेश्वरम् आराधयितुं प्रेरकः पूरकः च संभूय श्रावणमासं विविधव्रतवैकल्य-विविधपर्वसम्पन्नं करोति।

सद्यः अस्माकं परमपूज्य-श्रीमत्-सद्योजात-शङ्कराश्रमगुरुवर्याः श्रीवल्लीग्रामे श्रीचित्रापुरमठे चातुर्मासव्रतम् आचरन्तः सन्ति । अस्मिन् चातुर्मासे अन्तर्भूतः अधिकमासः तु आध्यात्मिकसाधनां घनीकर्तुम् एकः सुयोगः एव । प्रतिदिनं परमपूज्य-श्रीमत्-सद्योजात -शङ्कराश्रमगुरुवर्याणां दर्शनं, तेषां दिव्यवाण्यां शिवपूजनं देवीपूजनं

तथा स्वाध्यायः वैदिकमन्त्रघोषश्रवणं च अस्माकं सर्वेषां कृते नितान्त-धन्यतायाः अनुभूतिः खलु ।

' भवतु मनः लग्नं गुरोरङ्घ्रिपद्मे ' इति सम्प्रार्थ्य गीर्वाणप्रतिष्ठायाः इदं पत्रिकाकुसुमं वयं सहर्षं श्रीचरणयोः समर्पयामः ।

-सम्पादिका

## चिन्तनम्

- अनुराधा कर्पे , पालघर

**गीर्वाणप्रतिष्ठया कृतज्ञता-विषयम् अधिकृत्य आयोजितस्य चिन्तनस्य सारांशः अधः दीयते ।**

- **कृतज्ञता इत्युक्ते किम् ?**
  **केनापि कृतेन कस्यापि उपकारस्य ज्ञानं तथा स्मरणं वा तं प्रति सद्भावना इत्युक्ते कृतज्ञता ।**

- **कृतज्ञता कान् प्रति व्यवहरणीया दर्शनीया च ?**

### → अस्माकं कुटुम्बं प्रति।

अस्माकं कुटुम्बिनः प्रामुख्येन अस्माकं जन्मदातारौ ययोः ऋणं कदापि प्रत्यर्पयितुं न शक्यम् । गर्भधारणात् प्रारभ्य प्राणान्तिकां प्रसववेदनां सोढ्वा अपत्यस्य शैशवावस्थातः तस्य आत्मनिर्भरावस्थापर्यन्तं पालकाः यानि कष्टानि परिश्रमं च सम्मुखीकुर्वन्ति तेषां सीमा एव नास्ति । तेषां निर्व्याज-अहैतुक-वात्सल्यस्य भोक्तारः वयं धन्याः एव !

अस्माकं कुटुम्ब-सदस्याः बान्धवाः मित्राणि हितचिन्तकाः च सर्वे अस्माकं जीवने उत्साहं प्रेरणां स्नेहं प्रीतिं धैर्यम् आधारं च दत्त्वा अस्माकं जीवनं रसमयं कुर्वन्ति ।

### → अध्यापकान् प्रति ।

अध्यापकाः अस्माकं शारीरिक-मानसिक- बौद्धिक-वर्धनकाले सर्वसामर्थ्यप्रदायकाः । अध्यापकाः स्थाणवः इव सर्वाङ्गीणविकासार्थे कटिबद्धाः भवन्ति।

### → समाजं सर्वकारं च प्रति ।

समाजस्य सर्वकारस्य च कारणेन सर्वसौकर्याणाम् उपलब्धिं वयं प्राप्नुमः । मानवः एकाकी जीवितुं न शक्नोति । समूहे सङ्घटनेन सः विविधानि समाजोपयुक्तानि कार्याणि कर्तुं शक्नोति ।

### → ईश्वरनिर्मितसृष्टिं प्रति ।

निसर्गः अनन्तहस्तैः अनन्तवस्तूनि अस्मभ्यं ददाति । निसर्गे जीविताः पशुपक्षिणः अपि मूकत्वेन एव तेषां स्वामिभक्तिं , कृषिक्षेत्रस्य कर्षणकार्यं , धेनूनां समर्पणवृत्तिं दर्शयन्ति । केचन जन्तवः घातकपदार्थानां विनाशं कृत्वा पर्यावरणं स्वच्छीकर्तुं साहाय्यभूताः भवन्ति । अतः अस्माकं संस्काराः वन्यजीवनस्य निसर्गदत्त-निधेः पूजां यथा गोपूजा–जलपूजा-वृक्षपूजा-इत्यादीः कर्तुम् अस्मान् उद्युक्तान् कुर्वन्ति । श्रीकृष्णेन अपि गोवर्धनपूजा आरब्धा न वा ?

प्राकृतिकवैविध्यपूर्ण-सौन्दर्येण अस्माभिः दर्शनसौभाग्यं लभ्यते ।

**→ अस्माकं शरीरं प्रति ।**

अस्माकं शरीरस्य उपकाराः तु गणनातीताः । अस्माभिः न तु केवलं शरीरस्य सम्मानः करणीयः अपि तु श्वासाय अपि कृतज्ञता समर्पणीया यतोहि श्वासेन विना शरीरं मृतवत् एव । पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः बुद्धिः च शरीरमाध्यमेनैव लभन्ते यैः सर्वाणि कार्याणि सुकरतया भवन्ति ।

**→ अस्माकं पूज्यगुरुवर्यान् प्रति।**

सुखानां क्षणेषु तथा दुःखस्य समये एकः अदृश्यः हस्तः सदैव अभयदानं ददन् अस्माकं पृष्ठे स्थितः अस्ति । यः घनतमे अपि चैतन्यदीपं जागरयति सः अस्माकं गुरुः एव ।

जनयित्वा निजानन्दे रक्षित्वा मां क्षणे क्षणे ।

पाययन्तं भक्तिरसं मातृभूतं गुरुं भजे ॥

पालनाद्दुरितच्छेदात् कामितार्थ - प्रपूरणात् ।


पादुकामन्त्रशब्दार्थं विमृशन् मूर्ध्नि पूजयेत् ॥

अस्माकम् अन्तिमलक्ष्यं मोक्षप्राप्तिः एव । तदर्थे अधुनैव प्रयत्नः करणीयः । नोचेत् केन ज्ञातः अस्माकम् आयुष्यस्य परिधिः ? अतः मोक्षमार्गे प्रवासं कुर्वन्तः वयं यात्रिकाः गुरुवर्यैः दर्शितेन मार्गेण एव अनुगच्छामः । वयं पदभ्रष्टाः न भवेम इत्यर्थे गुरुः सदैव जागरूकः भवति । गुरुरेव अस्माकं त्राता अस्ति । अतः अस्माकं गुरुवर्यान् प्रति आजन्म कृतज्ञता दर्शितव्या अस्माभिः।

**निष्कर्षः**

कृतज्ञता एका महत्त्वपूर्णा अमूल्या च संवेदना अस्ति । कृतज्ञताप्रकटनं मानवतायाः सुसंस्कृततायाः च लक्षणम् अस्ति । तत्तु संस्काराणाम् आधारशिला अस्ति । अतः बाल्यादेव कृतज्ञतायाः बालगुटिका अस्माभिः अपत्येभ्यः दीयते चेत् भावि प्रजा निश्चयेन सुसंस्कारशीला भविष्यति ।

प्रसङ्गोचितसमये कृतेन कृतज्ञताप्रकटनेन परस्परं प्रति आत्मीयता वर्धते । कृतज्ञताप्रकटने मनुष्याणां मनुष्यत्वं प्रतिबिम्बितं भवति।



## मनोकामना

- वृन्दा चन्दावर , मुम्बई

सर्वतीर्थक्षेत्रपुण्यप्राप्तिः
भवतां श्रीचरणद्वये ।
जाह्नवीस्नानपुण्यप्राप्तिः
भवतां श्रीचरणद्वये ॥१॥

तेजोमयं भवताम् अक्षद्वयं
सदा वसतु मम नयनद्वये ।
प्रसन्नं मितभाषिवदनं
सदा विलसतु मम हृदयान्तरे ॥२॥

दिव्यपरिज्ञाननाम भवतां
सदा वसतु मम ओष्ठद्वये।
आशिषयुक्तहस्तः भवतां
सदा भवतु मम मस्तके ॥३॥

## सुभाषितम्

- शोभा बिळगी , मुम्बई

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।**

**लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥**

**भावार्थः -**

यस्य विवेकबुद्धिः नास्ति तस्य कृते शास्त्रं किमपि कर्तुं न शक्नोति । यः अन्धः अस्ति तस्य कृते दर्पणः निरर्थकः किल?

अन्यदेकम् उदाहरणं सर्वे जानन्ति एव यत् गर्दभस्य पुरतः गीतापठनेन किं प्रयोजनम् ?

मूर्खः शास्त्रस्य महत्त्वं ज्ञातुं न शक्नोति । तस्य कृते अनाकलनीयमेव अस्ति तत् । वेदविद्यां शास्त्रज्ञानं च प्राप्तुं स्वस्य चेतना आवश्यकी मेधाशक्तिः च दुर्धरा ।

## अधिकमासः

– वैशाली कोप्पीकर , बेङ्गळूरु

अधिकमासः मलमासः पुरुषोत्तममासः इत्यपि कथ्यते । को वा एषः अधिकमासः ? किमर्थमस्य आविर्भावः ? ज्ञास्यामः ।

ज्योतिषशास्त्रस्य एषः विषयः । सौरप्रणाल्यां ३६५ दिनानि ६ होराः प्रायः एकस्मिन् वर्षे कलिताः सन्ति । चान्द्रप्रणाल्याम् अस्माकं प्राक्कालीन- ज्योतिषिकैः आकलित-गणनानुसारं ३५४ दिनानि, ८ होराः, ४८ निमेषाः, ३६ क्षणाः इति वर्षस्यैकस्य गणना । एवं द्वयोः मध्ये आसन्नतया ११ दिनानि १ होरा ३१ निमेषाः १२ क्षणानां भेदः दृश्यते । एतस्य कालभेदस्य सामञ्जस्यार्थमेव अधिकमासः योजितः । एषः अधिकमासः कालभेदस्य सञ्चयस्य परिणामः । एषः प्रायः २.७ वर्षेषु एकमासात्मकं भवति । एषः मार्गशीर्षमासतः माघपर्यन्तं कस्मिन्नपि मासे आपतति ।

भारते प्रयुज्यमानेषु नैकेषु चान्द्रसौरप्रणालिषु हिन्दुपञ्चाङ्गः अन्यतमः ।

प्रति ३२ मासेभ्यः १६ दिनेभ्यः ८ घटिभ्यः च अनन्तरम् अधिकमासः प्रादुर्भवतीति वरिष्ठसिद्धान्ते प्रतिपादितं वर्तते । एषा कालगणना द्वयोः प्रणाल्योः गठने विशुद्धतमा इति मन्यते विद्वद्भिः।

पुरुषोत्तममासः इति नाम्ना विदितः अधिकमासः अध्यात्मचिन्तनाय परिकल्पितः मासः इति प्रसिद्धः । अस्य मासस्य अधिष्ठाता साक्षात् श्रीविष्णुः । भगवद्गीतायामपि अधिकमासविषये उक्तमस्ति । अस्मिन् मासे एकादशी पूर्णिमा च तिथी विशिष्टं सामञ्जस्यम् आवहतः । एतयोः तिथ्योः कृतानि तीर्थस्नान-जप-होमादीनि धार्मिक-वैदिक-कार्याणि अक्षय-फलदानि भवन्ति ।

मासपूर्णं फलकार्यं कर्तुमक्षमाः कृष्णपक्षस्य अष्टमी , नवमी, द्वादशी, चतुर्दशी पूर्णिमादिषु दिनेषु कृत्वा पुण्यभाजः भवितुमर्हन्ति । एतेषु दिनेषु गृहदोष-व्यक्तिगतदोषाणां निवारणार्थं, लौकिकविषयासक्तिं शिथिलीकर्तुम् , अलक्ष्मीं विप्रकृष्टुम् , एकाग्रतां साधयितुम् , उपवासव्रतं , धर्मग्रन्थानुसरणं , पठनं , पूजार्चादिकं क्रियन्ते ।

विवाहः नूतनगृहोपक्रमः विषयेच्छया उपवासः नूतनाभरणक्रयणं वाहनक्रयणादि च कार्याणि वर्जितानि भवेयुः इति वेत्तारः वदन्ति ।

प्रायः श्रावणशुक्ल-प्रतिपदायाः आरभ्य कृष्ण-अमावास्यापर्यन्तं प्रवर्तमाने अस्मिन् मासे शास्त्रोक्ततया आचरन्तः गुरुकृपापूर्णाः भवेम ।



## श्रीकृष्णः

– पूर्णिमा कोडकणी , कोल्हापूर

कः श्रीकृष्णः ?

प्रथमवारम् एव अपमानजनितं शब्दं श्रुत्वा शिरच्छेदनं कर्तुं समर्थः भूत्वा अपि नवनवतिवारम् अपशब्दान् श्रोतुं यस्मिन् भवति सहिष्णुता सः श्रीकृष्णः। सुदर्शनचक्रम् इव संहारकशस्त्रं धृत्वा अपि यस्य हस्ते वेणूवाद्यम् अस्ति सः श्रीकृष्णः । द्वारका इव वैभवसमृद्धनगर्याम् उषित्वा अपि यस्य सुदामा इव निर्धनं मित्रम् अस्ति सः श्रीकृष्णः । घातकविषधर-कालियानागं पराजित्य तस्य शिरसि नृत्यं करोति सः श्रीकृष्णः। स्वयं प्रचण्डसामर्थ्यशाली सन्नपि सारथिः भूत्वा युद्धे सारथ्यं करोति सः श्रीकृष्णः।

श्रीकृष्णः न तु व्यक्तिः परम् अप्रतिमविचाराणाम् एका अदृश्यशक्तिः ।

बालरञ्जनी

# श्रीकृष्णः गोकुलं प्राप्नोति

**– शिल्पा मुदूर मुम्बई**

श्रावण-मासः आसीत् । कृष्ण-पक्षस्य अष्टमी तिथिः । रात्रिसमयः । प्रचण्डः झञ्झावातः प्रवाति स्म । आकाशे द्योतमानाः विद्युल्लताः भयावहं मेघगर्जनं महावृष्टिः च । रात्रौ द्वादशवादने कंसस्य कारागृहे वसुदेवस्य पत्नी देवकी एकं पुत्रं प्रसूतवती । यावत् देवकी वसुदेवः च बालकस्य सुन्दररूपं पश्यन्तौ आस्ताम् , तावत् तत्र स्वयं भगवान् विष्णुः प्रकटितः । भगवान् विष्णुः अवदत् – 'युवयोः पुत्ररूपेण मम एव जन्म जातम् । पृथिव्यां दुष्ट-शक्तीनां विनाशार्थं धर्मस्य संस्थापनार्थं च अवतरितोऽहम् । हे वसुदेव, इदानीमेव एतं बालकं तव मित्रस्य नन्दस्य गृहं नय । तस्य नवजातां कन्यां च अत्र आनय ।' इति उक्त्वा भगवान् विष्णुः अन्तर्धानं गतः ।

वसुदेवः स्वभार्याम् अवदत् – 'प्रिये, विना विलम्बं भगवतः आदेशपालनं करणीयम् ।' माता देवकी पुनः एकवारं स्वशिशोः मुखकमलं प्रीत्या आलोकितवती । एषः तस्याः अष्टमः पुत्रः । इतः पूर्वं जाताः सप्तपुत्राः दुष्टभ्रात्रा कंसेन मारिताः । 'वसुदेव-देवक्योः अष्टम-पुत्रस्य हस्तेनैव कंसस्य वधः भविष्यति' इति आकाशवाणी पूर्वं सर्वैः श्रुता आसीत् । एतं शिशुम् अपि मारयितुं कंसः शीघ्रम् आगमिष्यति इति चिन्तयित्वा शिशोः ललाटे चुम्बनं दत्त्वा सा तं वसुदेवस्य हस्तयोः स्थापितवती ।



दया बाळे कोप्पिकर , न्यू जर्सी

अहो आश्चर्यम् ! अकस्मात् वसुदेवस्य लोहबन्धानि शिथिलीभूय पतितानि । कारागृहस्य द्वारं स्वयं उद्घटितम् । वसुदेवः शिशुम् एकस्मिन् कण्डोले स्थापितवान् शीघ्रं च ततः प्रस्थितवान् । इतोऽपि आश्चर्यम् ! द्वारात् बहिः स्थिताः सर्वे सैनिकाः निद्राधीनाः आसन् । विना अवरोधं सः कारागृहात् बहिः प्राप्तवान् ।

कण्डोलं मस्तके धृत्वा वसुदेवः चलितवान् । विष्णोः शय्या नागराजः शेषः स्वनाथं वृष्टिपातात् रक्षितुं फणमण्डलं प्रसारितवान् । एतत् विस्मयङ्करं दृश्यं द्रष्टुं भगवतः दर्शनं प्राप्तुं च देवाः स्वर्गलोकात् आगताः । यदा वसुदेवः यमुनातीरं प्राप्नोत् तदा इतोऽपि चमत्कारः जातः । यमुनायाः जलानि पृथग्भूतानि । वसुदेवः सलीलं नदीं तीर्त्वा अन्यत् तीरं गतवान् ।

सः वेगेन नन्दस्य गृहं प्राप्तवान् । तत्र अपि सर्वे गाढं निद्रिताः । नन्दस्य गृहे तस्यामेव रात्रौ एकस्याः कन्यायाः जन्म अभवत् । सा नन्दस्य भार्यायाः यशोदायाः समीपे दोलिकायां सुप्तासीत् । वसुदेवः स्वपुत्रं दोलिकायां निधाय तां कन्यां गृहीतवान् । पुत्रस्य मनोहरं कृष्णमुखं विलोक्य ततः कन्यां गृहीत्वा मथुरां प्रत्यागतवान् ।

एवं बालः श्रीकृष्णः मथुरातः गोकुलं प्राप्तवान् । गोकुले सः स्वलीलया गोपगोपिकानां मनांसि अहरत् । कतिपयान् राक्षसान् हतवान् च । तस्य मातुलः दुराचारी कंसः अपि तस्य हस्तेन मृत्युं प्राप्तवान् । अग्रे सः अर्जुनस्य सखा भूत्वा गीतोपदेशं दत्तवान् ।

यदा यदा पृथिव्यां धर्मस्य ग्लानिः भवति अधर्मः वर्धते च, तदा जगतः उद्धारार्थं स्वयं भगवान् अवतरति । तस्मै जगतः रक्षकाय जगद्गुरवे श्रीकृष्णाय नमः ।

## शब्दपटः

**कोशेषु अक्षराणि उचितक्रमेण पूरयतु -**



१. श्रीकृष्णस्य जन्मतिथिः → ☐ ☐ ☐
मी ष्ट अ

२. कृष्णस्य जन्मस्थानम् → ☐ ☐ ☐ ☐ ☐
ह का म् रा गृ

३. कृष्णस्य जनकः → ☐ ☐ ☐ ☐
दे वः सु व

४. कंसः कृष्णस्य → ☐ ☐ ☐
तु लः मा

५. नन्दस्य पत्नी → ☐ ☐ ☐
दा य शो

६. वसुदेवः नदीं तीर्त्वा गोकुलं गतवान् । नद्याः नाम → ☐ ☐ ☐
ना मु य

**अधोदत्तानां शब्दानां विपर्ययशब्दान् कथातः चिनोतु -**

१ मन्दम् × ______

२ इतः परम् × ______

३ अन्तः × ______

४ अनन्तरम् × ______

५ दूरे × ______

६ एकत्रीभूतानि × ______

**अधोदत्तपदानां सन्धिरूपाणि कथातः उद्धृत्य लिखतु -**

१. अवतरितः + अहम् = ______

२. इदानीम् + एव = ______

३. हस्तेन + एव = ______

४. सुप्ता + आसीत् = ______

उत्तराणि अन्तिमपृष्ठे दत्तानि

## रुचिरा



### बिम्बिपत्राणां सूपः

( कोङ्कणीभाषायाम् - ' तेण्ड्ले पान्ना तम्बळी ' )

- काञ्चन मण्णिगे , मुम्बई

**साहित्यम् –**

- बिम्बिपत्राणि - २५-३०
- घर्षित-नारिकेलम् - एककटोरपरिमितम्
- हरित-मरीचिका - ३
- जीरकाः - अर्धचमसपरिमितम्
- हिङ्गुः(Asafoetida) - आवश्यकतानुसारम्
- लवणम् - स्वादानुसारम्
- तिन्त्रिणी - स्वादानुसारम्
- तैलम् - अर्धचमसपरिमितम्



**कृतिः –**

बिम्बिपत्राणि समीचीनतया प्रक्षाल्य तानि एकस्मिन् पात्रे स्थापयित्वा किञ्चित् जले तानि पक्वानि करणीयानि। लघुभर्जनपात्रे अर्धचमसतैले हिङ्गुः हरित-मरीचिकाभिः सह किञ्चित् भर्जयितव्यः । तेन सह बिम्बिपत्राणि घर्षित-नारिकेलम् तिन्त्रिणीं जीरकान् आवश्यकतानुसारं जलं च योजयित्वा मिश्रकयन्त्रे पेषः करणीयः । आवश्यकतानुसारं लवणं योजयितव्यम् ।

बहु-रुचिकरः सूपः सिद्धः भवति । एषः शीतः एव सेवितव्यः । उष्णः न करणीयः।

अयं सूपः पचनक्रियायां साहाय्यकरः आरोग्यवर्धकः च । एतस्मिन् स्थितानि कॅल्शियम् - पोटॅशियमादीनि जीवसत्त्वानि अस्माकम् अस्थीनि प्रबलीकुर्वन्ति ।



## हास्यकणिका

-



एकः बालः स्वकीय-द्विचक्रिकां संसद्-भवनस्य पुरतः स्थापयित्वा गच्छन् अस्ति ।

आरक्षकः तम् अवरुद्ध्य पृच्छति ,

" तव द्विचक्रिकां त्वम् अत्र किमर्थं स्थापितवान् ? इतः बहवः प्रतिष्ठिताः जनाः मन्त्रिमहोदयाः च आगमन-निर्गमनं कुर्वन्ति । "

सः बालः निरागसतया उक्तवान् ," एवं वा ? चिन्ता मास्तु । द्विचक्रिका तालेन सम्यक् बद्धा अस्ति मया । "

## भक्त्याः पराकाष्ठा

**-सुधा भट कल्याणपूर , मङ्गलूरु**

एकस्मिन् दिने श्रीकृष्णः उद्धवस्य गृहं गतवान् । बहिः स्थित्वा द्वारं खटखटायितवान् । तस्मिन् समये उद्धवः गृहे नासीत् । उद्धवस्य पत्नी द्वारम् उद्घाटितवती । द्वारे अकस्मात् स्वस्य आराध्यदेवं श्रीकृष्णं दृष्ट्वा सा किञ्चित् सम्भ्रान्ता हर्षेण मुदिता च । किङ्कर्तव्यमूढा सा तम् अवलोकयन्ती द्वारे एव स्थितवती । श्रीकृष्णः अपि तस्याः सम्भ्रमं दृष्ट्वा स्मितमुखेन तिष्ठन् आसीत् । स्वल्पकालानन्तरं सः तां पृष्टवान् , " मां गृहान्ते अनुमतिः नास्ति किम् ? अहम् आगच्छानि वा ? " स्वप्नात् जागृता इव सा त्वरया तम् आहूतवती । स्वीयम् अपराधं मनसि चिन्तयन्ती सा श्रीकृष्णं सुखासने उपावेश्य तस्मै जलं दत्त्वा व्यजनसेवां च कृतवती । अनन्तरं पाकगृहं गत्वा श्रीकृष्णस्य कृते एकं कलशं दुग्धम् एकं चषकं घृतं स्थालिकायां कदलीफलानि च आनीतवती । तस्य चरणयोः समीपे उपविष्टवती । तदनन्तरं सा श्रीकृष्णाय दातुं कदलीफलस्य आवरणं निष्कासितवती । किन्तु श्रीकृष्णस्य मुखकमल-अवलोकने मग्ना सा फलं त्यक्त्वा तस्य आवरणम् एव घृते आप्लुत्य श्रीकृष्णस्य मुखे पूरयितुं प्रारम्भं कृतवती । मन्दस्मितः श्रीकृष्णः तस्य प्रीत्या आस्वादनं कृतवान् । स्वल्पसमयानन्तरम् उद्धवः प्रत्यागतवान् । श्रीकृष्णस्य आगमनेन सः अतीव प्रमुदितः । किन्तु परमात्मने श्रीकृष्णाय कदलीफल-आवरणं ददतीं पत्नीं दृष्ट्वा क्रुद्धः सः ताम् उक्तवान्, " अयि , भवती श्रीकृष्णाय फलस्य आवरणं किमर्थं ददाति ? फलं ददातु । " उद्धवस्य पत्नी लज्जिता भूत्वा," मम देव ! मां क्षमस्व ' इति याचितवती ।

श्रीकृष्णः उद्धवम् उद्दिश्य उक्तवान् ," उद्धव , घृतेन आप्लुतम् आवरणम् एव स्वादपूर्णम् अस्ति । कदलीफलानि तु मधुराणि सन्ति परन्तु भक्तिरसेन आप्लुतं मुग्धभावेन दत्तम् इदम् आवरणम् अधिकमधुरम् अधिकस्वादिष्टं च । "

सत्यमेव । प्रेम्णा भक्त्या च यत्किमपि दत्तं तत् ईश्वरः स्वीकरोति एव ।

श्रीकृष्णपरमात्मना भगवद्गीतायां स्वयं कथितम् ,

' पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ '

केवलं भक्तिः अस्माकं संसारतरणं साधयति ।

## भारती बहुभाषिणी

**- कृष्ण शर्मा , होन्नावर**



भारती बहुभाषिणी
विविधराग-तरङ्गिणी ।
विश्वशान्ति-प्रदायिनी
ऐक्यमन्त्र-तपस्विनी ॥१॥

एकस्यैव तरोराश्रये
बहुविध-विहङ्ग-कूजनम् ।
एकभाव-समन्वयेन
नित्यसमरस-गायनम् ॥२॥

सत्य-शिव-सौन्दर्यस्य
मूलरूपिणी सुवासिनी ।
वेदजननी धर्मदर्शिनी
अहिंसा-शान्ति-निबोधिनी॥३॥

# तस्मै पाणिनये नमः

**- शीला कलावर, ठाणे**

माहेश्वरसूत्रेषु वर्णानां चतुर्दश-समूहाः सन्ति । इमानि सूत्राणि वर्णमालायाः नूतनम् आयोजनम् इति चिन्तयामः । आयोजनस्य आधारः नाम 'प्रत्याहारः' । सर्वाणि व्यञ्जनानि हल् इति प्रत्याहारेण सर्वे स्वराः अच् इति प्रत्याहारेण च निर्दिश्यन्ते ।

उपदेशानां किञ्चित् परिचयः

पाणिनिना उपदिष्टाः - धातवः प्रत्ययाः आदेशाः आगमाः च - उपदेशाः इति उच्यन्ते ।

**➔ धातवः**

' धातवः ' नाम क्रियापदानां मूलरूपाणि । उदाहरणार्थम् – पठति ( reads ) इति एकं क्रियापदम् (verb) । अस्य क्रियापदस्य मूलरूपम् अस्ति 'पठ्' । अतः 'पठ्' इति मूलरूपस्य नाम 'धातुः' ।

एवमेव 'प्रातिपदिकानि' नाम नामपदानां मूलरूपाणि । उदाहरणार्थम् – गणेशाय (to/for Ganesha) इति एकं नामपदम् (noun) । अस्य नामपदस्य मूलरूपम् अस्ति 'गणेश' । अतः 'गणेश' इति मूलरूपस्य नाम 'प्रातिपदिकम्' ।

**➔ प्रत्ययाः**

पद-निर्माण-समये धातु-प्रातिपदिकाभ्यां परं यः आयाति सः प्रत्ययः ।

उदाहरणार्थम् –

वद् (धातुः) वदति (speaks) → वद् + अ + ति । अ, ति - इमौ प्रत्ययौ ।

सीता (प्रातिपदिकम्) सीताभिः → सीता + भिस् । भिस् - अयं प्रत्ययः ।

**तिङ् प्रत्ययः** - क्रियापदस्य अन्तिम-भागः ।

उदाहरणार्थम् – वदति इत्यस्मिन् क्रियापदे 'ति' इति तिङ्-प्रत्ययः ।

सेवते इत्यस्मिन् क्रियापदे 'ते' इति तिङ्-प्रत्ययः ।

**सुप् प्रत्ययः** - नामपदस्य अन्तिम-भागः ।

उदाहरणार्थम् – सीताभिः इत्यस्मिन् नामपदे 'भिस्' इति सुप्-प्रत्ययः ।

**➔ आदेशः**

पूर्वस्थितस्य वर्णस्य स्थाने अन्यवर्णस्य उदयः ।

यदि + अपि → [ इ → य् ] → यद्यपि ।

यत् + चलति → [ त् → च् ] → यच्चलति ।

**➔ आगमः**

वर्णात् पूर्वं परं वा अन्यवर्णस्य उदयः ।

पठन् + आगच्छति → [ न् - आगमः ] → पठन्नागच्छति ।

पठ्धातोः लङ्-लकारः (past tense) → [ अ-आगमः ] → अपठत् ।

एते सर्वे उपदेशाः तेषां मूलरूपेषु सन्ति ।

# कैवल्योपनिषत्

– कृष्णानन्द मङ्कीकर , मुम्बई

एषा लघु-उपनिषद् अतिशया महत्त्वपूर्णा । अथर्वणवेदे एषा समाविष्टा । अस्याः शान्तिमन्त्रः " भद्रं कर्णेभिः श्रृणुयाम देवाः... " इत्ययं मन्त्रः सुपरिचितः एव । अस्माकं पूजनीयैः गुरुवर्यैः अनेकवारं तेषां प्रवचनेषु अस्योपरि समीचीनं विवेचनं कृतमस्ति ।

एतस्याम् उपनिषदि शिष्यः आश्वलायनः ब्रह्माणं गुरुं निवेदयति, " अधीहि भगवन् ब्रह्मविद्याम् " इति । ब्रह्मविद्या या आत्मविद्या अथवा पराविद्या इत्यादिभिः शब्दैः ज्ञाता , तां विद्याम् अधीतुम् आश्वलायनः ब्रह्माणं प्रति उपागतः इति दृश्यते अत्र ।

आश्वलायनः ब्रह्मणा उक्त: " श्रद्धा-भक्ति-ध्यानयोगात् अवैहि " इति । एतान् त्रीन् विषयान् श्रीमद्भगवद्गीतायामपि भगवान् विस्तरेण अर्जुनं विशदीकृतवान् ।

अस्माकं मठे गुरुवर्याणां देवदर्शनानन्तरं वा जलाभिषेकानन्तरं वा पुरोहिताः निम्नोधृतौ श्लोकौ पठन्ति –

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥

एतौ श्लोकौ एतस्याम् उपनिषदि एव ।

अत्र उक्तम् अस्ति यत् सात्त्विकाः जनाः अन्तकाले ब्रह्मलोकं प्राप्नुवन्ति । किंविधाः जनाः ? यैः वेदान्तः अधीतः । तथा च यैः विज्ञानम् अधीतम् । वेदान्तः इति उपनिषदः । तासां ज्ञानं वेदान्तज्ञानम् । विज्ञानम् इति अध्यात्म-विषयकं ज्ञानम् । अर्थात् , यैः वेदान्तविचारेण तथा विज्ञानविचारेण स्वीयानि ध्येयानि सुनिश्चितीकृतानि ते मोक्षं प्राप्नुवन्ति । अन्यानि नानाविधानि कर्माणि , पुत्रपौत्रजनाः , धनम् अथवा त्यागः इत्यादीनि साधनानि अमृतत्त्वलाभाय न उपयुक्तानि । एतैः उपायैः अमृतत्त्वं न लभ्यते किन्तु केवलं वेदान्तेन तथा विज्ञानयोगेन एव इति अत्र स्पष्टतया कथितम् ।

अत्र आश्वलायनः एकः अधिकारी शिष्यः समागतः ज्ञानप्राप्त्यर्थम् । तेन वेदाः वेदाङ्गानि च अधीतानि । परम् एतेन ज्ञानेन अमृतत्त्वं न लभ्यते इति तेन अवगतम् । तदर्थमेव सः ब्रह्मण: सकाशमागतः । शिष्यः अद्वितीयः , ब्रह्मा तु स्वयं ब्रह्मवित् । अपूर्वोऽयं सङ्गमः ।


पञ्चमे षष्ठे तथा सप्तमे श्लोके ध्यानं कथं कुर्यात् इति कथितमस्ति । अष्टमे श्लोके ब्रह्मा शिवः विष्णुः इत्यादयः सर्वे देवाः परस्पराभिन्नाः इति प्रतिपादयित्वा ज्ञानविषयः नवमे दशमे तथा एकादशे श्लोके उक्तः ब्रह्मणा । एकादशः श्लोकः अतिप्रसिद्धः एव । एतस्मिन्विषयम् अग्रिमे संस्करणे पश्यामः ।

इत्यलम् ।

शुभं भवतु ।

## योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , मुम्बई**



## सुप्त-वज्रासनम्

**विधिः**
प्रथमं वज्रासने उपवेष्टव्यम् । अनन्तरं शनैः शनैः एकैकशः कूर्परौ पृष्ठतः भूमौ स्थापनीयौ । क्रमशः पृष्ठवंशः अपि भूमौ स्थापनीयः। अनन्तरं द्वावपि हस्तौ ऊर्वोः उपरि स्थापनीयौ अथवा द्वावपि हस्तौ मस्तकस्य उपरि नीत्वा सम्पुट्य भूमौ संस्थाप्य यावत् सुखं तावत् तस्यामेव स्थितौ स्थातव्यम् । पश्चिमोत्तानासनानन्तरम् अवश्यम् एतत् करणीयम् ।

**लाभाः –**
पृष्ठवंशः वङ्क्यः शिथिरः च भवति । गुल्फौ , जानुनी , सक्थिनी च प्रबलानि भवन्ति ।

**वर्ज्यम् –**
जान्वोः कटेः च विकारपीडिताः जनाः वैद्यानां प्रबोधनानुसारम् एव कुर्युः ।

## उत्तराणि

### शब्दपटः

**अक्षराणि उचितक्रमेण पूरयतु** - १. अष्टमी २. कारागृहम् ३. वसुदेवः ४. मातुलः ५. यशोदा ६. यमुना
**विपर्ययशब्दाः** - १. शीघ्रम् २. इतः पूर्वम् ३. बहिः ४. इदानीम् ५. समीपे ६. पृथग्भूतानि
**सन्धिरूपाणि** - १. अवतरितोऽहम् २. इदानीमेव ३. हस्तेनैव ४. सुप्तासीत्

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form